॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥
૩. તૃતીયઃ સર્ગઃ
અથ કદાચન સુંદરનંદનસ્મિતમુખેંદુદૃશાં દયિતૌ નૃણામ ।
મહમતો નિજબંધુમુદે મુદા પ્રયયતુઃ સ્વજનૈઃ સહ દંપતી ॥ ૩.૧ ॥
સ્વજનતાપગમાગમસંગમપ્રતિસભાજિતપૂર્વકસંભ્રમે ।
અવિદુષી જનનીતિ સ બાલકઃ શરણતો રણતો નિરગાન્નભિઃ ॥ ૩.૨ ॥
ક્વ નુ યિયાસસિ તાત ન સાંપ્રતં સ્વજનસંત્યજનં તવ સાંપ્રતમ ।
ઈતિ વિભુઃ પથિકૈરુદિતો વ્રજન સ્મિતમનાકુલમુત્તરમાતનોત ॥ ૩.૩ ॥
ત્વરિતમેત્ય સ કાનનદેવતાસદનમત્ર નનામ રમાપતિમ ।
અપિ તતઃ પ્રગતો લઘુ નાળિકેચુપપદાંતરસદ્મગતં ચ તમ ॥ ૩.૪ ॥
નળિનનાભનિભાલનસંમદાગમવિકસ્વરભાસ્વરલોચનઃ।
જનમનોનયનાંબુજભાસ્કરો રજતપીઠપુરં પ્રયયાવસૌ ॥ ૩.૫ ॥
સુહૃયમેધગણાતિશયાલવો હરિનમસ્કૃતયઃ સુકૃતા ઈમાઃ
ઈતિ સુરૈરપિ ભૂસુરમંડલૈઃ સમનમત સ સવિસ્મયમીક્ષિતઃ ॥ ૩.૬ ॥
ન હિ હરિં સતતં ન નમત્યસૌ ન ચ ન પશ્યતિ નાપિ ન વંદતે ।
અપિ તથેતિ વિધાય વિશેષતઃ સ નનુ સાધુજનાન સમશિક્ષયત ॥ ૩.૭ ॥
અનવલોક્ય સુતં સુતવત્સલો મૃગયતે સ્મ મહીસુરપુંગવઃ ।
મુહુરપૃચ્છદમુષ્ય ગતિં નરાન પથિ પથિ પ્રગતોનુપદં દ્રુતમ ॥ ૩.૮ ॥
જનસદાગતિસૂચિતવર્ત્મના પ્રતિપદં વ્રજતા પરયા તૃષા ।
દ્વિજમહામધુપેન મનોહરં સ્મિતમલાભિ સુતાનનવારિજમ ॥ ૩.૯ ॥

વિરહદૂનતયોદ્ગમનોન્મુખં ન્યરુણદશ્રુ પુરા સ ચયોર્દૃશોઃ ।
અથ તયોઃ પ્રમદોત્થિતમપ્ચ્યદઃ પ્રતિનિરુદ્ધ્ય ગિરં ગુરુરબ્રવીત ॥ ૩.૧૦ ॥
અયિ સુતેદમુદાહર તત્વતો નનુ સમાગતવાનસિ સાંપ્રતમ ।
સ્વજનતારહિતસ્ય તુ કોઽત્ર તે સહચરોઽર્ભક દીર્ઘતમે પથિ ॥ ૩.૧૧ ॥
જનકવાચમિમામવધારયન કળમુદાહરદંબુરુહેક્ષણઃ ।
સ્વપદમાવ્રજતો વ્રજતોઽપ્યતો નનુ સખા મમ કાનનગો વિભુઃ ॥ ૩.૧૨ ॥
તદિતરાયતનાત્તુ યદાઽગમં કૃતરતિઃ ખલુ તત્ર હરિઃ સખા
અહમિહાપિ મહેંદ્રદિગાલયં પ્રણતવાનુત યાવદધીશ્વરમ ॥ ૩.૧૩ ॥
અપિ તતોઽહમુપેત્ય સહામુના ભગવતેઽત્ર સતે પ્રણતિં વ્યધામ ।
ઈતિ નિગદ્ય વિભાતિ શિશુઃ સ્મ વિસ્મિતસભાજનચીર્ણસભાજનઃ ॥ ૩.૧૪ ॥
વિરહિતસ્વજનં ચરણપ્રિયં વિવિધભૂતભયંકરવર્ત્મનિ ।
અયિ કૃપાલય પાલય બાલકં લઘુશુભસ્ય મમેત્યનમદ દ્વિજઃ ॥ ૩.૧૫ ॥
તમુપગૃહ્ય સુતં સુતપોનિધિઃ ગૃહમસૌ ગૃહિણીસહિતો યયૌ ।
ઉદયતીતિ હિ બાલદિવાકરે સ્મિતમભૂત સુજનાનનવારિજમ ॥ ૩.૧૬ ॥
વરવિમાનગિરાવપિ ચંડિકા શિશુમહો જનની તમલાળયત ।
અપરથા પરિતુષ્ટમનાઃ કથં ચિરમિહૈષ વસેદ વિસહાયકઃ ॥ ૩.૧૭ ॥
સકલશબ્દમયી ચ સરસ્વતી સતતમાનમતિ સ્વયમેવ યમ ।
દ્વિજવરોઽથ કદાચન માતૃકાઃ કિલ સુતં પરિચાયયતિ સ્મતમ ॥ ૩.૧૮ ॥
લિપિકુલં નનુ તાત ગતે દિને લિખિતમેવ પુનર્લિખિતં કુતઃ ।
ઈતિ નિજપ્રતિભાગુણભાવિતં હરિપદસ્ય વચસ્તમનંદયત ॥ ૩.૧૯ ॥
શિશુરસૌ પ્રતિભાંબુધિરિત્યલં જનમનોવચનગ્રહપીડના ।

ન ભવતાદિતિ તં વિજનસ્થલે સ્વતનયં સમશિક્ષયદેષકઃ ॥ ૩.૨૦ ॥
મહવતા સ્વજનેન સમીરિતસ્વજનનીસહિતેન કદાચન ।
રુચિરવાચનયાઽર્ચિતવાક્છ્રિયા પ્રતિયયે પ્રભુણા ધૃતવલ્લ્યપિ ॥ ૩.૨૧ ॥
પરિષદા નિતરાં પરિવારિતઃ શિવપદઃ કિલ ધૌતપટોદ્ભવઃ ।
ઈહ કથાં કથયન દદૃશે તતઃ પૃથુધિયા પૃથુકાકૃતિનાઽમુના ॥ ૩.૨૨ ॥
ઈદમુવાચ વિચારવિચક્ષણઃ શુચિ વચઃ શનકૈઃ સ જનાંતરે ।
અપરથા કથિતં કથક ત્વયા નનુ મતાન્મહતામિતિ સસ્મિતમ ॥ ૩.૨૩ ॥
અગણયન્ન શિવં જનતા તદા સવચને વસુદેવસુતાહ્વયે ।
મુખરમિચ્ચતિ કો મૃગધૂર્તકં પ્રકૃત હુંકૃત સિંહ શિશૌ સતિ ॥ ૩.૨૪ ॥
અથ કથં કથયેતિ તદા જને ગદિતવત્યુચિતાર્થમુદાહરન ।
સ સમલાળ્યત વિસ્મયીભિર્નરૈઃ અપિ સુરૈર્વિજયાંકુરપૂજકૈઃ ॥ ૩.૨૫ ॥
સ જનનીસહિતો જનકં ગૃહે પ્રગતવાંસ્તમુદંતમવેદયત ।
નિગદ તાત શિવઃ કથકઃ સ કિં વિતથગીરથવાઽહમિતીરયન ॥ ૩.૨૬ ॥
નનુ સુતાવિતથં કથિતં ત્વયેત્યમુમુદીર્ય સવિસ્મયમસ્મરત ।
પ્રકૃતિતઃ કૃતિતા ખલુ મે શિશોઃ મદધિનાથદયોદયજેત્યસૌ ॥ ૩.૨૭ ॥
કથયતાં પ્રથમે કથયત્યલં સ્વજનકે જનસંઘવૃતે કથામ ।
સકલલોકમનોનયનોત્સવઃ ચતુરધીઃ સ કદાચિદવાચયત ॥ ૩.૨૮ ॥
વિવિધશાખિપદાર્થનિવેદને લિકુચનામ્ની તદાઽનુદિતાર્થકે ।
કિમિતિ તાત તદર્થમવર્ણયન કથયસીતિ શનૈરયમબ્રવીત ॥ ૩.૨૯ ॥
અવદતીતિ પિતર્યપિ ચોદિતે પ્રતિબુભુત્સુષુ તત્ર જનેષ્વપિ
અયમુદીર્ય તદર્થમવાપ્તવાન પરિષદો હ્યસમાનસુમાનનામ ॥ ૩.૩૦ ॥
બહુવિધૈશ્ચરિતૈરિતિ ચારુભિઃ સકલલોકકુતૂહલકારિણમ ।
દ્વિજવરેણ વચસ્યુચિતે સ્થિતં તમુપનેતુમનેન દધે મનઃ ॥ ૩.૩૧ ॥

સમુચિતગ્રહયોગગુણાન્વિતં સમવધાર્ય મુહૂર્તમદૂષણમ ।
પ્રણયબંધુરબાંધવવાનસૌ દ્વિજકુલાકુલમુત્સવમાતનોત ॥ ૩.૩૨ ॥
વિવિધવેદતયા વિજિહીર્ષવો વદનરંગપદેસ્ય ચિરાય યાઃ ।
સુરવરપ્રમદા અપિ સપ્રિયા અભિનનંદુરહો વિયતો મહમ ॥ ૩.૩૩ ॥
વિહિતસાધનસાધિતસત્ક્રિયોજ્વલનમુજ્જ્વલધીર્જ્વલયન્નયમ ।
ઉપનિનાય સુતં સુકુમારકં કુશલિનં કુશલીકૃતશીર્ષકમ ॥ ૩.૩૪ ॥
પરિચરાગ્નિગુરૂ ચરિતવ્રતઃ સુચરણઃ પઠ સાધુ સદાગમાન ।
ઈતિ ગુરોસ્ત્રિજગદ્ગુરુશિક્ષણે સ્ફુટમહાસિ સુરૈઃ કૃતસાક્ષિભિઃ ॥ ૩.૩૫ ॥
જિતકુમારગુણં સુકુમારકં નિજકુમારમવેક્ષ્ય નિરંતરમ ।
સમુચિતાચરણે ચતુરં સ્વતઃ ક્ષિતિસુરો મુદમાયત શિક્ષયન ॥ ૩.૩૬ ॥
સપટખંડમકિંચનવત કવચિત સ્વવિભવાનુચિતં ચરણાદિકમ ।
ભુવનભર્તુરહો સ્વનિગૂહનં સુરસભાસુ કુતૂહલમાતનોત ॥ ૩.૩૭ ॥
અવિરળૈર્ગરળોષ્મભિરાકુલી કૃતસમસ્તજનો વિચચાર યઃ ।
કવચિદમું નિજઘાંસુરશાંતિમાનુપસસર્પ સ સર્પ મયોઽસુરઃ ॥ ૩.૩૮ ॥
ત્વરિતમુધતવિસ્તૃતમસ્તકઃ પ્રતિદદંશ યદૈનમવિક્ષતમ ।
પ્રભુપદારુણચારુતરાંગુલીવિહતિપિષ્ટતનુઃ પ્રતતામ સઃ ॥ ૩.૩૯ ॥
ગરુડતુંડમિવ પ્રતિપન્નવાન દ્વિજકુમારપદં સ મમાર ચ ।
સમુચિતં ચરિતં મહતામિદં સુમનસો મનસેષ્ટમપૂજયન ॥ ૩.૪૦ ॥
ગિરિશગુર્વમરેંદ્રમુખૈશ્ચ યચ્ચરણરેણુરધારિ સુરેશ્વરૈઃ ।
ક્ષિતિસુરાંધ્ર્યભિવંદનપૂર્વકં સ વિદધેઽધ્યયનં છલમાનુષઃ ॥ ૩.૪૧ ॥
કરતળે ખલુ કંદુકવત સદા સકલયા કલયા સહ વિદ્યયા ।
અરિધરેણ સમં સ્ફુરિતં ગુરોઃ મનસિ તસ્ય વિડંબયતો જનાન ॥ ૩.૪૨ ॥

અનધિકૈરધિકૈશ્ચ વચસ્યથો બહુભિરધ્યયનોપરમાંતરે ।
અનિકટે વટુભિઃ પટુભિર્ગુરોઃ સ વિજહાર સુખી સખિભિઃ સમમ ॥
૩.૪૩ ॥
પદમુદીર્ય જવેન યિયાસિતં દ્રુતસખિષ્ટભવત સ પુરસ્સરઃ ।
અયમયત્નતયેતિ ન વિસ્મયો નનુ મનોજવજિત પવનોઽસકૌ ॥ ૩.૪૪ ॥
પ્લવનતેજસિ હંત ન કેવલં વિજિતવાન સ તદા સકલાન જનાન ।
પ્રભુનિદેશકરો હનુમત તનૌ નનુ જિગાય સ વાલિસુતાદિકાન ॥ ૩.૪૫ ॥
જલવિહારપરાજયિભિઃ સ્પૃધા સખિભિરીરિતવારિપરિશ્રિતમ ।
વદનમાકુલલોચનમાદધે સ્મિતમમુષ્ય હિ કંચન વિભ્રમમ ॥ ૩.૪૬ ॥
સ શનકૈર્બલિનો યુગપદ્ધતાન પ્રવિહૃતેષુ સખીન નિરપાતયત ।
અશનકૈર્યુગપત પ્રકૃતાહવાન સહસિતો દ્વિજસૂનુરયત્નવાન ॥ ૩.૪૭ ॥
ગ્રહણ નિગ્રહણે ગ્રહણે દૃઢે ગુરુભરોદ્ધરણાદિવિધૌ પટૌ ।
ઇહ વિભાવુપચારધિયા નૃણાં ઋતમયં નનુ ભીમ ઈતીરિતમ ॥ ૩.૪૮ ॥
વિહરતીતિ પઠત્યપિ ન સ્ફુટં સ્વગૃહગામિનિ ચાદ્રુતમાયતિ ।
પરિતુતોષ ન તત્ર જગદ્ગુરૌ સ કિલ પૂગવનાન્વયજો દ્વિજઃ ॥ ૩.૪૯ ॥
અથ કદાચન સોઽધ્યયનાંતરે તમવદત કુપિતોઽન્યમનસ્વિનમ ।
પઠસિ નો શઠ તે સખિભિઃ સમં કિમિતિ નિત્યમુદાસિતધીરિતિ ॥ ૩.૫૦
॥
ગુણનિકા ચરણાદિકગોચરા ન મમ હૃદ્યયિતેત્યુદિતેઽમુના ।
વદ વિશારદવાદ યથેપ્સિતં ત્વમુપરીત્યવદદ્ધરણીસુરઃ ॥ ૩.૫૧ ॥
સકલલક્ષણશિક્ષણમૂલભૂઃ શ્રુતિસમામનનં સ્ખલનોજ્ઝિતમ ।
ન ખલુ કેવલમસ્ય ગુરોર્વ્યધાત સુમનસામપિ તત્ર કુતૂહલમ ॥ ૩.૫૨ ॥
પ્રિયવયસ્યશિરોગુરુવેદનાં અશમયત સહજામપિ દુસ્સહામ ।

સ વિપિને વિજને મુખવાયુના શ્રવણ ગોચરિતેન કદાચન ॥ ૩.૫૩ ॥
અધિગતોપનિષચ્ચ સકૃચ્છ્રુતા પ્રકટભાગવતીતિ ન વિસ્મયઃ ।
અધિગતા નનુ જાત્વપિ ન શ્રુતાઃ પ્રતિભયા શ્રુતયઃ શતશોઽમુના ॥ ૩.૫૪ ॥
સાક્ષાદથોપનિષદો વિભુરૈતરેય્યાઃ
પાઠચ્છલેન વિજનેઽર્થરસં બ્રુવાણઃ ।
અધ્યાપકાય વિતતાર વિમોક્ષબીજં
ગોવિંદભક્તિમુચિતાં ગુરુદક્ષિણાં સઃ ॥ ૩.૫૫ ॥
અયિ સ્વામિન દુષ્ટાન દમયદમય સ્પષ્ટમુચિરાદ
ગુણાન ગૂઢાન વિષ્ણોઃ કથયકથય સ્વાન પ્રમદયન ।
તદાઽઽનંદં તન્વન્નિતિ સુમનસાં સોઽનુસરતા
મનુજ્ઞામાદત્ત ત્રિભુવનગુરુર્બ્રાહ્મણગુરોઃ ॥ ૩.૫૬ ॥
॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે તૃતીયઃ સર્ગઃ ॥